Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

संस्कृत - साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १७५
डिसेम्बर - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### ग्रामं गच्छन् तृणं स्पृशति

मिहिरः उपाध्यायः, गोपालः उपाध्यायः च। तयोः उपाध्यायवर्ययोः दिशा भिन्ना। स्वभावः भिन्नः। प्रवृत्तिः भिन्ना। तथापि द्वयोः प्रकाशमाना सज्जनता समाना। बहुभ्यः वर्षेभ्यः तौ मम उपकारिणौ वयस्यौ। अद्य तौ स्वयं न जानीतः, तम् उपकारं प्रकाशयामि। संस्कृतजगति जीवन्तौ तौ संस्कृतं प्रति उन्मत्तान् अनेकान् सज्जनान् आकर्षतः। फलतः तयोः परिमलम् अनुसरन्तः तादृशाः सज्जनाः 'ग्रामं गच्छन् तृणं स्पृशति' इति उदाहरणस्य बलेन माम् अपि किञ्चित् स्पृशन्ति।

संस्कृतजगति विद्यमानानां पौराणिकानां मुखानां वर्णनं कर्तुम् अद्य उपक्रमः नास्ति। यतो हि तेषां यशः तु 'दिवङ्गतम्!' तान् प्रति पुनः पुनः का विचारणा ? वस्तुतः ये सज्जनाः प्रख्यातेः उन्मादात्, पारितोषिकस्य आसक्तेः, गुणगानपरम्परायाः मोहात् वा कानिचित् पदानि दूरं गत्वा, केवलं सरस्वतीम् उपासन्ते ते भूतले धन्याः।

गोपालस्य हृदयं दुर्जनः प्रवेष्टुं नार्हति। तथैव मिहिरस्य गृहं खलु 'असंस्कृतः' मनुष्यः पदं कर्तुं न शक्नोति। तस्मात् कारणात् संस्कृतं निःस्वार्थम् अध्येतुकामा काचित् भारती पटेलः नाम भगिनी दृष्टा मया। सा चिकित्साक्षेत्रे उद्योगं करोति। वृद्धानां जिह्वया वक्तुं शक्यते यत् पूर्वजन्मनः पुण्येन सा सम्प्रति संस्कृतं प्रति प्रीतिमती वर्तते। तस्याः संस्कृते आसक्तिः प्रबला। यदा व्याकरणस्य कांश्चन अंशान् ज्ञातुं प्रयतमाना सा कुत्रचित् क्लेशम् अनुभवति तदा भृशं विषीदति। अहम् अवगन्तुं न शक्नोति इति तस्याः दुःखम्! कल्पनां कुर्वन्तु भवन्तः। कस्मिंश्चित् जन्मतः कुण्ठिते अध्यापके एतादृशस्य भावविशेषस्य दर्शनं वयं कर्तुं शक्नुमः ? एषा 'दुर्घटना' न जायते, अतः शिक्षणजगत् सुखेन शेते।

अपरा वर्तते संस्कृतमयी मूर्तिः। तस्याः नाम ओजसी सुखटणकरः। ओजसी अध्यापकस्य पत्नी अस्ति। परन्तु पार्श्वे वनितास्यूतं लम्बयित्वा पत्युः कार्यक्रमेषु सौन्दर्यप्रदर्शनं न करोति। भगवद्गीतायां पूर्णतः निमग्ना सा संस्कृतस्य अध्ययनं प्रारब्धवती। ततः संस्कृतम् अपि तस्याः जीवनस्य अङ्गम् अभवत्। व्याकरणं स्वल्पं जानती सा आह्लादकं संस्कृतसम्भाषणं कर्तुं शक्नोति। सुन्दराणि पद्यानि रचयति इति तु तस्याः भगवता प्रेषितः गुणविशेषः। ओजसी प्रसिद्धा नास्ति, परं समृद्धा निश्चयेन अस्ति।

एतादृशानि नैकानि संस्कृतरत्नानि भूतलं तेजसा पूरयन्ति। तानि अस्माभिः अन्वेष्टव्यानि। कारणं कालिदासस्य कुमारसम्भवे लभ्यते – 'न अन्विष्यति रत्नं, मृग्यते हि तत्।'

## जीवेषु दयाया: फलम्

व्योम शाहः



इक्ष्वाकुवंशे नृप: दिलीप: जात: । स: अद्भुत: शासक: आसीत् । तस्य कृते सर्वाणि सुखानि सुलभानि आसन् । तस्य राष्ट्रस्य प्रजा अपि सन्तुष्टा आसीत् । दैववशात् स: पुत्रविहीन: आसीत् । स: चिन्तितवान् – "सन्तत्या विना अस्या: सम्पत्त्या: किं प्रयोजनम् ?" कदाचित् स: स्वीयां व्यथां गुरवे वसिष्ठाय अकथयत् । गुरु: किञ्चिद् ध्यात्वा मधुरेण वचनेन उक्तवान् – "सम्प्रति कामधेनु: तु अत्र नास्ति । किन्तु तस्या: पुत्री नन्दिनी मम आश्रमे अस्ति । भवान् एकाग्रतया कामधेनुपुत्र्या: नन्दिन्या: सेवां करोतु । कामधेनो: प्रसादेन भवत: मनोरथा: सफला: भविष्यन्ति" इति ।

गुरो: वचनं यथातथम् अनुसृत्य स: एकविंशतिदिनानि यावत् तस्या: धेनो: सेवाम् अकरोत् । कस्मिंश्चिद् दिने स: हिमालयस्य गुहायां प्राविशत् । अन्त: गत्वा स: अतीव चकित: । तत्र प्रकृत्या: सौन्दर्येण स: मन्त्रमुग्ध: जात: । तदैव कश्चित् सिंह: तस्या: धेनो: पृष्ठे आरूढ: । तद् दृष्ट्वा दिलीप: क्रुद्ध: जात: । स: निषङ्गे स्थितं शरं हस्तेन अस्पृशत् । किन्तु भाग्यवशात् तस्य कर: पिच्छेषु सक्त: जात: । तद् अनुभूय स: बहु विस्मित: क्रुद्ध: च ।

एवं स्थितं भूपालं दिलीपं दृष्ट्वा सिंह: मनुष्यवाण्या अवदत् – "भो: महीपाल ! अलं तव श्रमेण । मां प्रति क्षिप्तं प्रत्येकं शरं विफलम् एव भविष्यति । वायो: शक्त्या वृक्षा: कम्पन्ते न तु पर्वता: । वस्तुत: अहं भगवत: शङ्करस्य सेवक: । पश्यतु, तत्र दूरं य: वृक्ष: दृश्यते स: शिवपार्वत्यो: प्रिय: । कदाचित् कश्चित् गज: तं वृक्षं अपीडयत् । तदानीं भगवता आदिष्ट: अहं यत् – 'एतस्य वृक्षस्य समीपम् एव तिष्ठतु । न कुत्रापि अन्यत्र गन्तव्यम् इति ।' तत: प्रभृति अहम् अत्रैव अस्मि । बहु–समयानन्तरम् अहं किञ्चित् खादितुं प्राप्तवान् । क्षुधितस्य मम सन्तोषाय अहं एनां धेनुं भक्षयिष्यामि एव । अत: त्वम् इत: सुखेन गच्छ । अयं तव शर: ईश्वरस्य शिवस्य प्रभावेण निष्फल: जात: । अत: दु:खित: मा भवतु ।"

किञ्चिद् विचार्य स: तं सिंहम् अवदत् – "स: महेश: मम अपि पूज्य: । एतस्यां धेन्वाम् अपि मम अखण्डिता भक्ति: । किन्तु अहम् एतया धेन्वा विना कथं गच्छामि ? एतत् खलु मम गुरो: वसिष्ठस्य धनम् । एतया

विना सः कथं यज्ञादीनि कर्माणि कुर्यात्। एकः विकल्पः अस्ति येन धेनुः अपि स्वतन्त्रा भविष्यति भवतः च बुभुक्षा चापि शान्ता भविष्यति।''

सिंहः उदितवान् – ''कथमेतत्? किं मिथ्या जल्पसि?''

दिलीपः उक्तवान् – ''मिथ्या न वदामि। त्वं धेनुं मुञ्च मां च भक्षय। अनेन तव बभुक्षा अपि शान्ता भविष्यति धेनुः च मुक्ता भविष्यति। अतः त्वं माम् एव भक्षय।''

दिलीपस्य वचनं श्रुत्वा सिंहः उक्तवान् – ''हे भूपाल! त्वं मूढः। त्वं विवेकहीनः यत् केवलम् एकस्याः धेनोः कृते त्वं सर्वस्वस्य त्वागाय प्रवृत्तः। त्वं पृथिवीपतिः असि। त्वं तरुणः असि। त्वं सुन्दरः अपि असि। तथापि तुभ्यं तव शरीरं न रोचते। सर्वस्वम् अपि त्यक्त्वा तव कः लाभ? तव मरणेन केवलम् एकस्याः धेनोः संरक्षणं भवति। किन्तु तव जीवितेन समस्तप्रजायाः रक्षणं स्यात्। यदि तव गुरुः क्रुद्धः भवेत् तर्हि तस्मै भूरिशः धेनूः देहि। तेन तस्य कोपः शाम्येत्।''

सिंहस्य वचनं श्रुत्वा दिलीपः अवदत् – ''सामान्यानां धेनूनां दानेन गुरोः कोपः कथं शाम्येत्? एषा कामधेनुपुत्री नन्दिनी। अपि च सः एव क्षत्रियः यः प्रजाः रक्षति। यः प्रजानां संरक्षणे न समर्थः तस्य कृते राज्यस्य किं प्रयोजनम्? अतः त्वं प्रसीद, धेनुं मुञ्च मां भक्षय। तेन गुरोः अपि धनं रक्षितं भविष्यति तव च बुभुक्षा शान्ता भविष्यति। हे शम्भोः सेवक! अद्य एतेन सम्भाषणेन आवयोः मैत्री सञ्जाता। अहं तव मित्रमेव। अतः कृपया मित्रस्य प्रार्थनां स्वीकुरु।''

सिंहः – ''तथा'' इति अवदत्। तदैव पृष्ठे निषङ्गे लग्नः तस्य करः मुक्तः जातः। सः शस्त्राणि त्यक्तवान्। निर्भयः भूत्वा सः सिंहस्य पुरतः अधोमुखः स्थितः। क्षणार्धे तस्योपरि पुष्पवृष्टिः जाता। दिलीपः तत्र सिंहं न अपश्यत्।

तदैव धेनुः अवदत् – ''वत्स! अद्य तव परीक्षणाय अहमेव मायया सिंहं रचितवती। अहं तव भक्त्या प्रसन्ना अस्मि। वरं याचस्व'' इति। साञ्जलिः नृपः सुपुत्रम् अयाचत। गच्छताकालेन दिलीपस्य महिषी सुदक्षिणा रघुनामकं गुणवन्तं पुत्रम् अजनयत्।

## मासवार्ता

**आरब्धः Diploma in Sanskrit Teaching अभ्यासक्रमः।**

संस्कृतमाध्यमेन संस्कृतं पाठयितुं शिक्षकानां प्रशिक्षणाय एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं Diploma in Sanskrit Teaching इति अभ्यासक्रमं सञ्चालयति। एतस्मिन् वर्षेऽपि ऑक्टोबरमासस्य ८ दिनाङ्के अभ्यासक्रमोऽयम् आरब्धः। १३ छात्राः अभ्यासक्रमेऽस्मिन् प्रवेशं स्वीकृतवन्तः। अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन सह संलग्नः वर्तते। जुनमासपर्यन्तं छात्राः अभ्यासक्रमेऽस्मिन् संस्कृतशिक्षकप्रशिक्षणं स्वीकरिष्यन्ति।

## विश्वशान्तेरुपायः

डॉ. सुखेश्वरः झा

विश्वं जगत्। तस्य शान्तेः कः स्यात् उपायः इति वस्तुतः विचारणीयः प्रश्नः।

संसारे सम्प्रति विषमता एधमाना वर्तते। ईर्ष्या सर्वत्र प्रसरति। एको देशः अपरं देशं द्वेष्टि। मनुष्यो मनुष्याय ईर्ष्यति द्रुह्यति क्रुध्यति च परस्परस्य उत्कर्षम् असहमानः। सभ्यतायाः डिण्डिमनादो बोभवीति। परन्तु नियमः वन्य एव प्रबलः। वने अनेके पशवो वसन्ति। तेषु च अबलो बलिभिः हिंस्यते। तस्य रक्तः पेपीयते। तस्य मांसः चाखाद्यते। तद्वत् लोकेषु अपि रूपान्तरेण स्थितिः एषैव प्रतीयते। जनो दुर्बलो बलिभिः सन्ताड्यते हन्यते वा। दुर्बलं राष्ट्रं बलिना विहन्यते। दुर्बलः पक्षः सबलेन प्रतार्यते पीड्यते वा। न केवलं दूरवर्तिषु अपितु अन्तरङ्गेषु ज्ञाति-बन्धुजनेष्वपि भ्रातृष्वपि कलहः-वैषम्यम् - अशान्तिः दरीदृश्यते। अस्यां स्थितौ विश्वशान्तेः उपायः चिन्तनीयतया अवश्यम् उपतिष्ठते।

आधुनिकः कालो विज्ञानस्य अभिधीयते। विज्ञानं विशिष्टं ज्ञानं भवति। वस्तुतः तत् तथेति मन्तव्यम्। किन्तु सदुःखम् एतत् अभिधानीयं भवति यत् तद् विशिष्टत्वं मानव-कल्याणमपेक्ष्य तत्संहाराय अधिकतरम् उपयुज्यते। विज्ञानस्य विकासेन सहैव घातकानाम् अस्त्राणां शस्त्राणाञ्च उदयः सुप्रबलः सञ्जातः। श्रूयते यत् अमेरिकायाः रूसस्य च पार्श्वे प्रचुरतया तावन्तः मारकपदार्थाः सन्ति यावद्भिः मनुष्याणां समग्राणाम् एव संहारः क्षणेन एव भवेत् यदि तेषां तथा दुरुपयोगः क्रियेत। असहनशीलता तावती विवृद्धा यद् ब्रह्मास्त्र-प्रक्षेपणेऽपि जनाः संकोचं नैव कुर्युः। शक्ति-प्रदर्शन सञ्चय-दर्शनेषु जगत् अशान्तात् अशान्ततरं सम्पद्यमानम् अस्ति। अशान्तिः वस्तुतो विश्वस्य प्रबला समस्या उपस्थिता वर्तते।

प्रकृतेः स्वभावात् पूर्वपुरुषात् परपुरुषे संख्याबाहुल्यं भवत्येव। एकस्य धान्यस्य मञ्जर्याम् अनेकानि धान्यानि सर्व-दृष्टानि। विविधानां धान्यानां शाकानां तरुगुल्मानां, पक्षिणां, पशूनां नरपशूनाञ्च सैवगतिः स्वाभाविकी। सप्तश्रेणीः प्राग् एकस्य जनस्य सन्ततिभिः तद्वंशोत्पन्नाभिः एव इदानीम् एको ग्रामः सम्पन्नः। अतः वर्धमाना जनसङ्ख्या एकतः, अपरतश्च उपयोज्यसामग्री न्यूना इति स्वार्थसंघर्षात् अशान्तिः वर्धतेतराम्। सैषा स्थितिः न्यूनाधिकतया विश्वव्यापिनी। अतः सकले संसारे अशान्तिः विविधकारणेन वर्तते तराम्, वर्तिष्यते च वर्धिष्यत एव वा इति एवम् एव प्रतिभाति। अतः शान्तेरुपायो वस्तुतो जिज्ञास्यः।

अत्रेदम् अवधेयम् - जनसङ्ख्यावृद्धिः संसार-स्वभावात् अनिवार्या एव। सा च उढग्रा सती आशु एव अतिविकटा मा भूत् इति जन्मक्रमनियन्त्रणम् अपि आवश्यकम्। परन्तु एतन्मूलायाः अशान्तेः वास्तविकं समाधानम् उद्योगस्य बहुलीकरणात् सेवा-नियोजनावसर-सम्वद्धनात् उपयोज्यवस्तूनां प्राचुर्येणोत्पादनात् उत्पन्नस्य च सम्यगावष्टनप्रबन्धात् एव सम्भवति। अभावे स्वभावोऽपि नश्यति। बुभुक्षितः किन्न करोति पापम् इति प्रसिद्धम्। अतः आवश्यकता-शान्त्या एव वास्तविकी शान्तिः।

(क्रमशः...)

## मासवार्ता

### सम्पन्नौ संस्कृतभाषाशिक्षणस्य वर्गौ




संस्कृतभाषायाः अध्ययनं कर्तुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन संस्कृतभाषाशिक्षणस्य अभ्यासक्रमाः सञ्चाल्यन्ते । एतस्मिन् एव उपक्रमे डिसेम्बरमासस्य प्रथमे सप्ताहे संस्कृतभाषाशिक्षणस्य प्रथमस्तरः द्वितीयस्तरः इत्येतौ अभ्यासक्रमौ सम्पन्नौ । अभ्यासक्रमोऽयं मासत्रयं प्राचलत् । अत्र उल्लेखनीयं यत् संस्कृतभाषाशिक्षणस्य अनयोः अभ्यासक्रमयोः विश्वस्य विविधेभ्यः देशेभ्यः यथा भारत, अमेरीका, केनेडा, ऑस्ट्रेलियादिदेशेभ्यः ५४ छात्राः संस्कृतभाषायाः अध्ययनम् अकुर्वन् । संस्कृतं पठित्वा एते छात्राः प्रसन्नाः आसन् । अत्र उल्लेखनीयं यत् जनवरीमासस्य प्रथमेसप्ताहे नूतनाभ्यासक्रमस्य आरम्भो भविष्यति ।

### आरब्धः 'Value Education through Sanskrit' इति अभ्यासक्रमः

बालकाः संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतेः परिचयं प्राप्नुयुः इति लक्ष्यीकृत्य एकलव्य-संस्कृत-एकेडेमीसंस्थाने Value Education through Sanskrit बालसंस्कृतवर्गः' इति अभ्यासक्रमः सञ्चाल्यते । अभ्यासक्रमेऽस्मिन् Skg तः ८ कक्ष्यायाः छात्राणां कृते संस्कृतपाठनस्य उत्तमा व्यवस्था कल्पितास्ति । एतेन अभ्यासक्रमेण बालेषु विविधाः क्षमताः यथा उच्चारणशुद्धिः स्मरणशक्तेः विकासः व्यक्तिविकासश्च भवति । छात्राः नवेम्बरमासतः आरभ्य एप्रिलमासपर्यन्तं शनिवासरे सायं ६ वादनतः ७.३० वादनपर्यन्तं संस्कृतं पठिष्यन्ति । श्रीमती अमी गोहीलः श्रीपारूल, व्यासः च छात्रान् पाठयिष्यतः ।

## कृपया हसन्तु

पत्नी - (पतिम् उद्दिश्य) भोः ! बहु पिपासा वर्तते किञ्चित् जलं तु ददातु ।

पतिः - यदि त्वम् इच्छसि तर्हि जलं किं तव कृते मिष्टान्नम् आनयामि... तुभ्यं यादृशं भोजनं रोचते तादृशं भोजनम् आनयामि ।

पत्नी - भोः ! भवान् दयालुः अस्ति । एतत् सर्वं श्रुत्वा मम मुखे जलमागतम् ।

पतिः - एवं.... तर्हि तेनैव जलेन त्वं तव पिपासां निवारय ।

★ ★ ★ ★ ★

रमणः - भोः चोपडामहोदय ! भवान् 'चेमिस्ट' अस्ति खलु ?

चोपडामहोदयः - आं रमण ! किन्तु 'चेमिस्ट' न 'केमिस्ट' (chemist) इति अस्ति... । 'ch' इत्यस्य उच्चारणं 'च' न 'क' इति वर्तते ।

रमणः - अस्तु... कोपडामहोदय..... ।

★ ★ ★ ★ ★

नमनः - (रमणं प्रति) भोः रमण ! मम शकासात् त्वया दशसहस्ररूप्यकाणि स्वीकृतानि आसन् तानि कदा दास्यसि ?

रमणः - भोः मां किमर्थं पृच्छसि ? किम् अहं ज्योतिषाचार्यः अस्मि ?

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**राजन् ! कमलपत्राक्ष ! तत्ते भवतु चाक्षयम् ।**
**आसादयति यद्रूपं करेणुः करणैः विना ॥**

कमलमिव नेत्रयुक्त राजन्, करेणोः (हस्तिन्याः) करणानि (इन्द्रयाणि) यदि न भवेयुः तर्हि यत् रूपं प्राप्येत तत् भवतः अक्षयं भवतु । करेणुः इत्यस्मिन् शब्दे क् र् ण् इत्येतान् वर्णान् यदि निष्कासयेम तर्हि अवशिष्यते – अ + ए + उः । (सन्धिः कार्यः)

**उत्तरम्** – आयुः

**राज्ञः सम्बोधनं किं स्यात् ? सुग्रीवस्य तु का प्रिया ?**
**अधनास्तु किमिच्छन्ति ? आर्तैः किं क्रियते वद ॥**

'देव !' – राज्ञः सम्बोधनम् । 'तारा' – सुग्रीवस्य प्रिया ।

'धनम्' – निर्धनैः इष्यते । अर्थिभिः किं क्रियते ?

**उत्तरम्** – देवताराधनम्

**वने जाता वने त्यक्ता वने तिष्ठति नित्यशः ।**
**पण्यस्त्री न तु सा वेश्या यो जानाति स पण्डितः ॥**

एषा अरण्ये जाता । किन्तु ततः दूरङ्गता सा जले सर्वदा स्थास्यति । धननिमित्तं स्वस्य विक्रयणं कुर्वती अपि सा वेश्या न । का एषा इति यः जानाति सः पण्डितः ।

**उत्तरम्** – नौका

## ज्ञानसरिता

श्यामः पटेलः

**विस्मयकारी निलगिरीवृक्षः** –वनस्पतिजगति निलगिरीनामकः वृक्षः प्रसिद्धः। तस्य विश्वे ७०० प्रजातयः वर्तन्ते। कासपीनसयोः निवारणार्थं निलगिरीवृक्षस्य तैलम् अत्युपयोगि भवति।

अयं वृक्षः आवर्षं हरितः एव भवति। यस्मिन् काले अन्यवृक्षाः शुष्कताम् आप्नुवन्ति तदापि एषः वृक्षः नैवाप्नोति। ओस्ट्रेलियादेशे निलगिरीवृक्षाः ९२ मीटरमितानां भवन्ति। पुष्पजनकवृक्षेषु एते उत्तुङ्गतमाः। एते वृक्षाः –३ डिग्रीमितस्य वातावरणेऽपि जीवन्तः तिष्ठन्ति।

यदा अन्येषां वृक्षाणां पर्णानि शाखातः पतन्ति तदा एतस्य वृक्षस्य तु शाखाः एव निपतन्ति। सम्पूर्णे अरण्ये तेषां शाखाभिः भूमिः आच्छादिता भवति। अरण्ये जायमाने अग्नौ निलगिरीवृक्षस्य महत् योगदानं भवति। कारणम् अस्ति यत् ताः शाखाः तैलयुक्ताः। अतः ज्वलनशीलाः भवन्ति। अतः अग्निं वर्धयन्ति। किन्तु तदा अपि निलगिरीवृक्षस्य स्कन्धः वा कायः औष्ण्यं सोढुं शक्नोति। अरण्ये अग्निशमनान्तरं निलगिरीवृक्षाः त्वरया पुनः वर्धन्ते। अनेकवारम् अग्नेः भोजनं संभूय एते पुनः वृद्धिं प्राप्नुवन्ति। तस्य कारणं यत् निलगिरीवृक्षस्य मूलेषु विशिष्टग्रन्थयः भवन्ति। ते ग्रन्थयः अग्निना न नश्यन्ति। वृक्षस्य स्कन्धेऽपि एतादृशाः ग्रन्थयः भवन्ति। यदा अग्निः प्रज्वालितः भवति तदा वृक्षस्य स्कन्धे विस्फोटः भवति। तस्मात् ते ग्रन्थयः उड्डीय दूरे पतन्ति। अनन्तरं तेभ्यः ग्रन्थिभ्यः पुनः निलगिरीवृक्षाः उद्भवन्ति। एषा एव विस्मयकारिणी घटना अस्ति यत् अग्निना सर्वं नश्यति तत्र निलगिरीवृक्षाः जीवन्ति। निलगिरीवृक्षस्य तैलेन सहितं मधु श्लेष्मा चापि औषधेषु उपयोगिनः सन्ति।

निलगिरीवृक्षः – Eucalyptus, मधु – Honey, श्लेषमा – Edible gum of tree

## शब्दमञ्जूषा

| | |
|---|---|
| **विमानविश्रान्तिस्थलम्** | aerodrome |
| **विमानम्** | aeroplane |
| **सादृश्यविधानम्** | analogy |
| **जलयानप्रतिरोधी** | anchor |
| **कोणः** | angle |
| **वार्षिकम्** | annual |
| **शृङ्गिका** | antenna |
| **चयनिका** | anthology |
| **रोगाणुरोधकः** | antiseptic |
| **धारासभा** | assembly |
| **सभा, संस्था** | association |
| **प्राड्विवाकपरिषद्** | bar association |
| **विधेयकम्, धनप्रदानपत्रम्** | bill |
| **श्यामपट्टम्** | black-board |
| **भयादोहनम्** | blackmail |

## किं भवन्तः जानन्ति ?

**१) गीतगोविन्दस्य कर्ता कः वर्तते ?**

(क) भामहः (ख) जयदेवः (ग) भर्तुहरिः (घ) जायसी

**२) हर्षचरितस्य रचयिता कः वर्तते ?**

(क) बाणभट्टः (ख) पतञ्जलिः (ग) जायसी (घ) शूद्रकः

**३) किरातार्जुनीयस्य कर्ता कः अस्ति ?**

(क) स्वयंभूदेवः (ख) नारायणपण्डितः (ग) अमरुकः (घ) भारविः

**४) लघुसिद्धान्तकौमुद्याः रचयिता कः वर्तते ?**

(क) वरदराजाचार्यः (ख) तुलसीदासः (ग) राजशेखरः (घ) भासः

**५) रामायणस्य कर्ता कः वर्तते ?**

(क) ब्रह्मा (ख) वेदव्यासः (ग) वाल्मीकिः (घ) कालिदासः

**६) महाभारतस्य रचयिता कः अस्ति ?**

(क) श्रीकृष्णः (ख) वेदव्यासः (ग) तुलसीदासः (घ) पतञ्जलिः

**७) एतेषु कस्मिन् ग्रन्थे कश्मीरस्य इतिहासः वर्णितः अस्ति ?**

(क) दशरूपकम् (ख) राजतरङ्गिणी (ग) कादम्बरी (घ) मालतीमाधव

उत्तराणि – (१) ख (२) क (३) घ (४) क (५) ग (६) ख (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

Value Education Through Sanskrit in

## बालसंस्कारकेन्द्रम्

(Class 4 to 6)

## बालसंस्कृतकेन्द्रम्

(Class 7 & 8)

**Date :** 21/11/20 to 10/04/21
**Day :** Every Saturday
**Time :** 6:00 pm to 7:30 pm
**Fees :** 3000/-

➤ **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 1/1/21 to 31/3/21
**Day :** Mon-Wed-Fri
**Time :** 7:30 am to 9:00 am
**Fees :** 5000/-

**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 1/1/21 to 31/3/21
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm
**Fees :** 5000/-

**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006